अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ...........................

**Paper Code**
**MSS-205**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – मईमासः – 2019

## एम.ए. संस्कृतम्, (सत्रम् : द्वितीयम्)

## पंचमपत्रम्–धर्मशास्त्र, अर्थशास्त्र व आयुर्वेद

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

### खण्डः क
### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

**1.** अधोलिखितयोः श्लोकयोः व्याख्या कार्या –
(क) तेषां त्ववयवान्सूक्ष्मान्षण्णामप्यमितौजसाम्।
सन्निवेश्यात्ममात्रासु सर्वभूतानि निर्ममे।।
(ख) अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः।
ताभिः सार्धमिदं सर्वं सम्भवत्यनुपूर्वशः।।

**2.** अधोलिखितयोः श्लोकयोः व्याख्या कार्या –
(क) वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम्।
फलन्त्यनुयुगं लोके प्रभावाश्च शरीरिणाम्।।
(ख) मौलाञ्छास्त्रविदः शूराँल्लब्धलक्षान्कुलोद्भवान्।
सचिवान् सप्त चाष्टौ वा प्रकुर्वीत परीक्षितान्।।

**3.** अधोलिखितयोः श्लोकयोः व्याख्या कार्या –
(क) पुरोहितञ्च कुर्वीत वृणुयादेव चर्त्विजः।
तेऽस्य गृह्याणि कर्माणि कुर्युर्वैतानिकानि च।।
(ख) नाद्यादजीर्णवमथुश्वासकासज्वरार्दिती।
तृष्णास्यपाकहृन्नेत्रशिरःकर्णामयी च तत्।।

**4.** अधोलिखितयोः श्लोकयोः व्याख्या कार्या –
(क) दीपनं वृष्यमायुष्यं स्नानमूर्जाबलप्रदम्।
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मजित्।।
(ख) जीर्णे हितं मितञ्चाद्यान्न वेगानीरयेद्बलात्।
न वेगितोऽन्यकार्यः स्यान्नाजित्वा साध्यमामयम्।।

**5.** अधोलिखितयोः श्लोकयोः व्याख्या कार्या –
(क) त्रिवर्गशून्यं नारम्भं भजेत्तं चाविरोधयन्।
अनुयायात्प्रतिपद सर्वधर्मेषु मध्यमाम्।।
(ख) नासिकां न विकुष्णीयान्नाकस्माद्विलिखेद् भुवम्।
नाङ्गैश्चेष्टेत विगुणं नासीतोत्कटकश्चिरम्।।

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवल चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

**अधोलिखितानाम् अंशानां सोपपत्ति व्याख्यां कुरुत –**

1. एष त्रयीधर्मश्चतुर्णां वर्णानामाश्रमाणाञ्च स्वधर्मस्थापनादौपकारिकः।
2. एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः।
   सबन्धुराष्ट्रा राजानो विनेशुरजितेन्द्रियाः।।
3. कामवशाः क्षयव्यसनिनिमित्तमरिव्याधिभिरिति।
4. परिभवो द्रव्यनाशः पाटच्चरद्यूतकारलुब्धकगायकवादकैश्चानर्थ्यैः संयोगः कामः।
5. वाक्यपारुष्यार्थदूषणयोर्वाक्यपारुष्य गरीय इति विशालाक्षः।
6. असतां प्रग्रहः कामः कोपश्चावग्रहः सताम्।
   व्यसनं दोषबाहुल्यादत्यन्तमुभयं मतम्।।

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे पञ्चातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय एकङ्काः निर्धारिताः वर्त्तन्ते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति। **(05×01=05)**

1. मनुस्मृतिमाश्रित्य ब्राह्मणादिवर्णसृष्टिविषयः संक्षेपेण प्रतिपादनीयः।
2. अष्टाङ्गहृदयानुसारं बाह्ममुहूर्त्तजागरणविषयः नातिविस्तरेण लेख्यः।
3. कौटलीयार्थशास्त्रमनुसृत्य त्रयीस्थापनाविषय ससंक्षेप प्रतिपादयत।
4. कौटलीयार्थशास्त्रानुसारं वृद्धसंयोगविषयः ससंक्षेपः लेखनीयः।
5. कौटनीयार्थशास्त्रानुसारं धूतदोषाः संक्षेपेण प्रतिपादनीयाः।

--------------x--------------